॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ६६

अपश्यंस्तु ततस्तत्र पितरं पितुरालये ।
जगाम भरतो द्रष्टुं मातरं मातुरालये ॥ १॥

अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतम् ।
उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमानसं ॥ २॥

स प्रविश्यैव धर्मात्मा स्वगृहं श्रीविवर्जितम् ।
भरतः प्रेक्ष्य जग्राह जनन्याश्चरणौ शुभौ ॥ ३॥

तं मूर्ध्नि समुपाघ्राय परिष्वज्य यशस्विनम् ।
अङ्के भरतमारोप्य प्रष्टुं समुपचक्रमे ॥ ४॥

अद्य ते कति चिद्रात्र्यश्च्युतस्यार्यकवेश्मनः ।
अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥ ५॥

आर्यकस्ते सुकुशलो युधाजिन्मातुलस्तव ।
प्रवासाच्च सुखं पुत्र सर्वं मे वक्तुमर्हसि ॥ ६॥

एवं पृष्ठस्तु कैकेय्या प्रियं पार्थिवनन्दनः ।
आचष्ट भरतः सर्वं मात्रे राजीवलोचनः ॥ ७॥

अद्य मे सप्तमी रात्रिश्च्युतस्यार्यकवेश्मनः ।
अम्बायाः कुशली तातो युधाजिन्मातुलश् च मे ॥ ८॥

यन्मे धनं च रत्नं च ददौ राजा परन्तपः ।
परिश्रान्तं पथ्यभवत्ततोऽहं पूर्वमागतः ॥ ९॥

राजवाक्यहरैर्दूतैस्त्वर्यमाणोऽहमागतः ।
यदहं प्रष्टुमिच्छामि तदम्बा वक्तुमर्हसि ॥ १०॥

शून्योऽयं शयनीयस्ते पर्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे ॥ ११॥

राजा भवति भूयिष्ठगमिहाम्बाया निवेशने ।
तमहं नाद्य पश्यामि द्रष्टुमिच्छन्निहागतः ॥ १२॥

पितुर्ग्रहीष्ये चरणौ तं ममाख्याहि पृच्छतः ।
आहोस्विदम्ब ज्येष्ठायाः कौसल्याया निवेशने ॥ १३॥

तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता ।
या गतिः सर्वभूतानां तां गतिं ते पिता गतः ॥ १४॥

तच्छ्रुत्वा भरतो वाक्यं धर्माभिजनवाञ्शुचिः ।
पपात सहसा भूमौ पितृशोकबलार्दितः ॥ १५॥

ततः शोकेन संवीतः पितुर्मरणदुःखितः ।
विललाप महातेजा भ्रान्ताकुलितचेतनः ॥ १६॥

एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा ।
तदिदं न विभात्यद्य विहीनं तेन धीमता ॥ १७॥

तमार्तं देवसङ्काशं समीक्ष्य पतितं भुवि ।
उत्थापयित्वा शोकार्तं वचनं चेदमब्रवीत् ॥ १८॥

उत्तिष्ठोत्तिष्ठ किं शेषे राजपुत्र महायशः ।
त्वद्विधा न हि शोचन्ति सन्तः सदसि संमताः ॥ १९॥

स रुदत्या चिरं कालं भूमौ विपरिवृत्य च ।
जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः ॥ २०॥

अभिषेक्ष्यति रामं तु राजा यज्ञं नु यक्ष्यति ।
इत्यहं कृतसङ्कल्पो हृष्टो यात्रामयासिषम् ॥ २१॥

तदिदं ह्यन्यथा भूतं व्यवदीर्णं मनो मम ।
पितरं यो न पश्यामि नित्यं प्रियहिते रतम् ॥ २२॥

अम्ब केनात्यगाद्राजा व्याधिना मय्यनागते ।
धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम् ॥ २३॥

न नूनं मां महाराजः प्राप्तं जानाति कीर्तिमान् ।
उपजिघ्रेद्धि मां मूर्ध्नि तातः संनम्य सत्वरम् ॥ २४॥

क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ।
येन मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥ २५॥

यो मे भ्राता पिता बन्धुर्यस्य दासोऽस्मि धीमतः ।
तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्ट कर्मणः ॥ २६॥

पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः ।
तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम ॥ २७॥

आर्ये किमब्रवीद्राजा पिता मे सत्यविक्रमः ।
पश्चिमं साधुसन्देशमिच्छामि श्रोतुमात्मनः ॥ २८॥

इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ।
रामेति राजा विलपन्हा सीते लक्ष्मणेति च ।
स महात्मा परं लोकं गतो गतिमतां वरः ॥ २९॥

इमां तु पश्चिमां वाचं व्याजहार पिता तव ।
काल धर्मपरिक्षिप्तः पाशैरिव महागजः ॥ ३०॥

सिद्धार्थास्तु नरा राममागतं सीतया सह ।
लक्ष्मणं च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥ ३१॥

तच्छ्रुत्वा विषसादैव द्वितीया प्रियशंसनात् ।
विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥ ३२॥

क्व चेदानीं स धर्मात्मा कौसल्यानन्दवर्धनः ।
लक्ष्मणेन सह भ्रात्रा सीतया च समं गतः ॥ ३३॥

तथा पृष्टा यथातत्त्वमाख्यातुमुपचक्रमे ।
मातास्य युगपद्वाक्यं विप्रियं प्रियशङ्कया ॥ ३४॥

स हि राजसुतः पुत्र चीरवासा महावनम् ।
दण्डकान्सह वैदेह्या लक्ष्मणानुचरो गतः ॥ ३५॥

तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया ।
स्वस्य वंशस्य माहात्म्यात्प्रष्टुं समुपचक्रमे ॥ ३६॥

कच्चिन्न ब्राह्मणवधं हृतं रामेण कस्य चित् ।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥ ३७॥

कच्चिन्न परदारान्वा राजपुत्रोऽभिमन्यते ।
कस्मात्स दण्डकारण्ये भ्रूणहेव विवासितः ॥ ३८॥

अथास्य चपला माता तत्स्वकर्म यथातथम् ।
तेनैव स्त्रीस्वभावेन व्याहर्तुमुपचक्रमे ॥ ३९॥

न ब्राह्मण धनं किञ्चिद्धृतं रामेण कस्य चित् ।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ।
न रामः परदारांश्च चक्षुर्भ्यामपि पश्यति ॥ ४०॥

मया तु पुत्र श्रुत्वैव रामस्यैवाभिषेचनम् ।
याचितस्ते पिता राज्यं रामस्य च विवासनम् ॥ ४१॥

स स्ववृत्तिं समास्थाय पिता ते तत्तथाकरोत् ।
रामश्च सहसौमित्रिः प्रेषितः सह सीतया ॥ ४२॥

तमपश्यन्प्रियं पुत्रं महीपालो महायशाः ।
पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान् ॥ ४३॥

त्वया त्विदानीं धर्मज्ञ राजत्वमवलम्ब्यताम् ।
त्वत्कृते हि मया सर्वमिदमेवंविधं कृतम् ॥ ४४॥

तत्पुत्र शीघ्रं विधिना विधिज्ञैर्
वसिष्ठमुख्यैः सहितो द्विजेन्द्रैः ।
सङ्कल्प्य राजानमदीनसत्त्वम्
आत्मानमुर्व्यामभिषेचयस्व ॥ ४५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com